प्राणोत्क्रमिष्यायां वागादिशैथिल्यापत्तिं शरीरपातप्रसङ्गञ्च दर्शयन्ती श्रुतिः प्राणनिमित्तां शरीरेन्द्रियस्थितिं दर्शयति। “तान् वरिष्ठः प्राणः उवाच मा मोहमापद्यथाहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामि” इति च। एतमेवार्थं श्रुतिराह। “प्राणेन रक्षन्नवरं कुलाय” इति च। सुप्तेषु चक्षुरादिषु प्राणनिमित्तां शरीररक्षां दर्शयति। “यस्मात् कस्माच्चाङ्गात् प्राण उत्क्रामति तदेव तच्छुष्यति तेन यदश्नाति यत् पिबति तेनेतरान् प्राणानवति” इति च प्राणनिमित्तां शरीरेन्द्रियपुष्टिं दर्शयति। “कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि ? कस्मिन् ? वा प्रतिष्ठितेऽहं प्रतिष्ठास्यामीति स प्राणमसृजत” इति प्राणनिमित्ते एव जीवस्योत्क्रान्तिप्रतिष्ठे दर्शयति” भा०। “पञ्चवृत्तिर्मनोवद्व्यपदिश्यते” सू०। “इतश्चास्ति मुख्यप्राणस्य वैशेषिकं कार्यं यत्कारणं पञ्चवृत्तिरयं व्यपदिश्यते श्रुतिषु “प्राणोऽपानो व्यान उदानः समानः” इति। वृत्तिभेदश्चायं कार्य्यभेदापेक्षः। प्राणः प्राग्वृत्तिरुच्छ्वासादिकर्म्मा, अपानोऽवाग्वृत्तिर्निश्वासादिकर्म्मा, व्यानः तयोः सन्धौ वर्त्तमानो वीर्य्यवत्कर्म्महेतुः, उदानः ऊर्ध्ववृत्तिरुत्क्रान्त्यादिहेतुः, समानः समं सर्वेष्वङ्गेषु योऽन्नरसान्नयति इति। एवं पञ्चवृत्तिः प्राणः मनोवत् यथा मनसः पञ्च वृत्तयः एवं प्राणस्यापीत्यर्थः। श्रोत्रादिनिमित्ताः शब्दादिविषयाः मनसः पञ्च वृत्तयः प्रसिद्धाः। न तु कामः सङ्कल्प इत्याद्याः परिपठिताः परिगृह्येरन्, पञ्चसङ्ख्यातिरेकात्। नन्वत्रापि श्रोत्रादिनिरपेक्षा भूतभविष्यदादिविषयाऽपरा मनसो वृत्तिरस्तीति समानः पञ्चसङ्ख्यातिरेकः। एवं तर्हि परमतमप्रतिषिद्धमनुमतं भवतीति न्यायादिहापि योगशास्त्रप्रसिद्धा मनसः पञ्च वृत्तयः परिगृह्यन्ते प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयो नाम। बहुवृत्तित्वमात्रेण वा मनः प्राणस्य निदर्शनमिति द्रष्टव्यम्। जीवोपकरणत्वमपि प्राणस्य पञ्चवृत्तित्वान्मनोवदिति योजयितव्यम्” भा०। “अणुश्च” सू०। “अणुश्चायं मुख्यः प्राणः प्रत्येतव्यः इतरप्राणवत्। अणुत्वञ्चेहापि सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वं, पञ्चभिर्वृत्तिभिः कृत्स्नशरीरव्यापित्वात्। सूक्ष्मः, प्राण उत्क्रान्तौ पार्श्वस्थेनानुपलभ्यमानत्वात्, परिच्छिन्नश्चोत्क्रान्तिगत्यागतिश्रुतिभ्यः। ननु विभुत्वमपि प्राणस्य समाम्नायते, “समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण” इत्येवमादिषु प्रदेशेषु। तदुच्यते, आधिदैविकेन समष्टिव्यष्टिरूपेण हैरण्यगर्भेण प्राणात्मना एतद्विभुत्वमाम्नायते नाध्यात्मिकेन। अपि च समः प्लुषिणेत्यादिना साम्यवचनेन प्रतिप्राणिवर्त्तिनः प्राणस्य परिच्छेद एव प्रदर्श्यते तस्माददोषः” भा०। “ज्योतिराद्यधिष्ठानन्तु तदामननात्” सू०। “ते पुनः प्रकृताः प्राणाः किं स्वमहिम्नैव स्वस्मै स्वस्मै कार्य्याय प्रभवन्ति आहोस्विद्देवताधिष्ठानाः प्रभवन्तीति विचार्य्यते। तत्र प्राप्तं तावद्यथा, स्वकार्य्यशक्तियोगात् स्वमहिम्नैव प्राणाः प्रवर्तेरन्निति। अपि च देवताधिष्ठितानां प्राणानां प्रवृत्तावभ्युपगम्यमानायां तासामेवाधिष्ठात्रीणां देवतानां भोक्तृत्वप्रसङ्गात् शारीरस्य भोक्तृत्वं प्रलीयेत, अतः स्वमहिम्नैवैषां प्रवृत्तिरिति, एवं प्राप्ते इदमुच्यते। ज्योतिराद्यधिष्ठानन्त्विति। तुशब्देन पूर्वपक्षो व्यावर्त्त्यते। ज्योतिरादिभिरग्न्याद्यभिमानिनीभिर्देवताभिरधिष्ठितं वागादिकरणजातं स्वस्वकार्य्येषु प्रवर्तत इति प्रतिजानीते। हेतुञ्च व्याचष्टे तदामननादिति। तथा ह्यामनन्ति “अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादि”। अग्नेश्चायं वाग्भावो मुखप्रवेशश्च देवतात्मनोऽधिष्ठातृत्वमङ्गीकृत्योच्यते। नहि देवतासम्बन्धं प्रत्याख्यायाग्नेर्वाचि मुखे वा कश्चिद्विशेषः सम्बन्धो दृश्यते। तथा “वायुः प्राणो भूत्वा नासिके प्राविशत्” इत्येवमाद्यपि योजयितव्यम्। तथान्यत्रापि “वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च” इत्येवमादिना वागादीनामग्न्यादिज्योतिष्ट्ववचनेनैतमेवार्थं द्रढयति। “स वै वाचमेव प्रथममत्यवहत् सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत्” इति च। एवमादिना वागादीनामग्न्यादिभावापत्तिवचनेनैतमेवार्थं द्योतयति। सर्वत्र चाध्यात्माधिदैवतविभागेन वागाद्यग्न्याद्यनुक्रमणमनयैव प्रत्यासत्त्या भवति। स्मृतावपि “वागध्यात्ममिति प्राहुः ब्राह्मणास्तत्त्वदर्शिनः। वक्तव्यमधिभूतन्तु वह्निस्तत्राधिदैवतम्” इत्यादिना वागादीनामग्न्यादिदेवताधिष्ठितत्वं सप्रपञ्चं प्रदर्शितम्। यदुक्तं स्वकार्य्यशक्तियोगात् स्वमहिम्नैव प्राणाः प्रवर्त्तेरन्निति तदयुक्तम् शक्तानामपि शकटादीनामनडुदाद्यधिष्ठितानां प्रवृत्तिदर्शनात्। उभयथोपपत्तौ चागमाद्देवताधिष्ठितत्वमेव निश्चीयते। यदप्युक्तं देवतानामेवाधिष्ठात्रीणां भोक्तृत्वप्रसङ्गो न शारीरस्य जीवस्येति